# संस्कृत-वार्ता:

**दिनाङ्क :- 13 .03.2024**

**प्रात: - 06:55**

**प्रधानमन्त्री-सेमीकंडक्टर परियोजना:**

प्रधानमन्त्री नरेन्द्रमोदी अद्य दृश्य-श्रव्य-परान्तर्जालीय मध्यमेन 'इंडियाज टेक्ड-चिप्स फॉर विकसित भारत' इत्यस्मिन् कार्यक्रमे भागं भजिष्यति अपिच प्राय: सपादैक लक्ष्य कोटिरूप्यकाणां तिसृणां सामिप्रवाहक सेमीकंडक्टर इति परियोजनानां आधारशिलां स्थापयिष्यति। अस्मिन् अवसरे प्रधानमन्त्री देशस्य यून: अपि सम्बोधयिष्यति। गुजराते धोलेरा इत्यत्र विशिष्ट-निवेश-क्षेत्रे (डी.एस.आई.आर.) इत्यत्र सामिप्रवाहक सेमीकंडक्टर इति निर्माण सुविधाया: असम गुजरातयो: (ओ.एस.ए.टी) अर्थात आउट्सोर्स-सेमीकंडक्टर असेंबली टेस्ट सुविधाया: च आधारशिलां संस्थापयिष्यते। एता: परियोजना: देशस्य युवभ्य: वृत्यावसराणां सृजनाय भारतं विनिर्माणाय प्रौद्योगिक्या: विकासाय च वैश्विक केन्द्रस्य रूपे संस्थापनाय प्रधानमन्त्रिण: दृष्टिकोणानुरूपं वर्तते।

**प्रधानमन्त्री-सूरज**

प्रधानमंत्री नरेन्द्रमोदी अद्य दृश्य-श्रव्य परांतर्जालीय माध्यमेन वंचितवर्गाणां ऋण-सहायतायै एकस्मिन् विशिष्ट-राष्ट्रव्यापी-जनसंपर्क कार्यक्रमे भागं भाजिष्यति। श्रीमोदी प्रधानमंत्री सामाजिक उत्थान वृत्यावसराधारितं जनकल्याण (पीएम-सूरज) राष्ट्रीय पोर्टल इत्यस्यापि शुभारंभं करिष्यति अपिच देशस्य वंचित वर्गाणां एक लक्ष्य उद्यमिभ्यः ऋण-सहायतां प्रदास्यति। एतदतिरीच्य प्रधानमंत्री तेषु विभिन्न सर्वकारी योजनानां लाभार्थिभिः सह चर्चां विधास्यति। अस्मिन् अवसरे श्रीमोदी एकां जनसभाम् अपि संबोधयिष्यति।

कार्यक्रमे विभिन्न सर्वकारी योजनानां वंचित समूहानां प्रायः त्रिलक्ष्य लाभार्थिनः भागं भजिष्यन्ति।

**प्रधानमन्त्री/सुनक**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्य: इंग्लैण्ड देशस्य प्रधानमन्त्रिणा ऋषि सुनकेन सह दूरभाषे चर्चा कृता। उभौ द्विपक्षीय-व्यापक-रणनितिक-सहभागितां सुदृढीकर्तुं स्वीय प्रतिबद्धताया: पुष्टिं कृवन्तौ।

**अवैधसङ्घ**

केन्द्रेण जम्मू-कश्मीर-राष्ट्रियमोर्चा दलं पञ्चवर्षाणां कृते तत्कालप्रभावेण अवैधसङ्घत्वेन घोषितः। सामाजिकान्तर्जाल संदेशमाध्यमेन केन्द्रीयगृहमन्त्री अमितशाहः अवदत् यत्, जम्मू-कश्मीरं भारतात् विच्छेदनार्थं पृथक्तावादीनां कार्येषु संघटनोयं

संलग्नः आसीत्। संघोऽयं आतङ्कवादस्य , राष्ट्रस्य सार्वभौमत्वं, सुरक्षां, अखण्डतां च समर्थयन् आसीत् । सः अवदत्, नरेन्द्रमोदीसर्वकारः भारतस्य जनानां सुरक्षां सुनिश्चेतुं आततायि बलानाम् उन्मूलनार्थं प्रतिबद्धः अस्ति।

**राष्ट्रपति/मॉरिशस**

राष्ट्रपतेः द्वीपराष्ट्रस्य यात्रायाः तृतीये दिवसे अद्य भारत-मारिशसदेशयोः मध्ये प्रतिनिधिमण्डलस्तरीया वार्ता भविष्यति। उपवेशने राष्ट्रपति द्रौपदी मुर्मुः मॉरिशस देशस्य प्रधानमंत्री प्रवीन्द्र कुमार जुगनौथः च भविष्यतः। उपवेशनावधौ विभिन्न ज्ञापनपत्राणां आदानप्रदानं च भविष्यति नैकासां परियोजनानां आभासीयमाध्यमेन उद्घाटनं च भविष्यति। राष्ट्रपति मुर्मुः अप्रवासी घाटे अन्तरमहाद्वीपीय-दासता-संग्रहालयेऽपि गमिष्यति।

**महिला-क्रिकेट-लीग-स्पर्धा**

गतरात्रौ महिलानां क्रिकेट-प्रीमीयर-लीग प्रतिस्पर्धायां अरूणजेटलीति क्रीडांगणे रॉयल चैलेजर्स बेंगलुरू इत्यनेन दलेन मुम्बई इंडियंस इत्येतं दलं सप्त स्तोभैः पराजितम्।

**।। इति वार्ताः ।।**